॥ अथधनुर्मासप्रारंभः ॥

॥श्रीगणेशायनमः॥ अथधनुर्मासमहात्म्यप्रारंभः॥ शौनकउवाच॥ सूतसूतमहाभागसर्वज्ञारुत्रविशारद॥पुराणमखिलंवेत्थ
पाराशर्यप्रभावतः॥१॥सर्वेषामेवमासानांमहात्म्यंत्वमुखाद्युतं॥अधुनेहमहाभागधनुर्महात्म्यमुत्तमं॥२॥मासानामुत्तमंप्रोक्तंमासमो
र्गशिरामिधं॥अस्मिन्मासेकथंकार्यंहरेःपूजातथाद्विजाः॥३॥केःकेद्रव्यैःपूजनीयोमाधवोधनुरागमे॥एतद्दिनुमिछामिवक्तुमर्ह
स्यशेषतः॥४॥अहोधन्यस्त्वहोधन्यःजातोस्यद्यचपावनः॥एतेअद्यहरेर्धर्मान्श्रोतुंदृष्टोमयाधुना॥५॥हरेरुच्चारणेनैवसर्वपापक्षयो
भवेत्॥माहात्म्यश्रवणमात्रेणानन्येसार्पनसंशयः॥६॥तस्मात्सदान्नरैःकार्यंतथैवपुरुषैःसदा॥चापस्थेचयदाभानौस्नानंगछेत्सदं
नरः॥७॥पदेपदेश्वमेधंचप्राप्नोत्येवनसंशयः॥योगछेद्रनुरायांमंचापस्थेचदिवाकरे॥८॥भागीरथ्यांवहंचस्नानमात्रेणालभ्यते॥ब्राह्मेमू गा ६
हूर्त्तेचोत्थायस्मरेद्देवकिनंदनं॥९॥कृत्वावहिःस्थलेदूरेमलमूत्रविसर्जनं॥मृत्तिकांचैवमादायकृत्वाशौचंयथाविधिः॥१०॥दंतधावनपूर्वं
तीकृत्वाकार्यमतंद्रितः॥बहिर्जलेतथास्नायान्नित्यकर्मसमाचरेत्॥११॥देवपूजांतथाकार्यागंधपुष्पाक्षतैस्तथा॥नैवेद्यंचैवदातव्यंसुद्रमिश्रं
चओदनं॥१२॥नवनीतंचार्पयित्वामाषपिष्टेनखाद्यकं॥सूपंचअर्पयित्वातुसर्वोपस्करसंयुतं॥१३॥नानाशाखान्तथाभक्ष्यान्लेह्यान्पेयान्
तथैवच॥दधिखंडंप्रदातव्यंफलानिविविधानिच॥१४॥तांबूलंदक्षिणांचैवआर्तिकृत्वामनोरमां॥षोडशोपचारपूजास्तुभक्त्याचैवप्रकल्पयेत्
॥१५॥रवेरुदयवेलायांहरेःपूजासमारभेत्॥ब्राह्मणानांतथापूजायत्नंकुर्यात्प्रकल्पयेत्॥१६॥ब्राह्मणैःसहभोक्तव्यंतदन्नंयन्निवेदितं॥
द्विजातिरिक्तंयोभुंक्तेतदन्नंविष्ठयासमं॥१७॥ज्ञानभक्तियुतोविप्रसर्वपापक्षयोभवेत्॥तस्माद्द्याद्द्विजेंद्रायतत्त्वनिष्ठायधीमते॥१८॥अन्न
दःसर्वतीर्थानिअन्नदःसर्वदेवताः॥दातव्यंचैवविप्रान्नंवेछयाचद्विजातये॥१९॥भक्ष्यभोज्ययुतंचैवसघृतंनवनीतकं॥ब्राह्मणान्भोज
यित्वाथस्वयंभुक्तातनःपरं॥२०॥तांबूलंदक्षिणांदत्वाआशीर्वादांस्तथैवच॥एवंयःकुरुतेभक्त्यासर्वपापैःप्रमुच्यते॥२१॥एतद्व्रतंपुरा

पुराप्रोक्तंब्रह्मणेचनुनेहंसरूपीहरिःप्राहधनुर्माहात्म्यमंजसा॥२२॥यएतच्छ्रवणाद्वापिसर्वपापैःप्रमुच्यते॥ ॥इतिश्रीपंचरात्रागमे
धनुर्महात्म्येहंसब्रह्मसंवादेप्रथमोध्यायः॥ ॥श्रीब्रह्मोवाच॥धनुर्मासेहरेःपूजाकर्यंकार्यासुरोत्तम॥एतन्मेसंशयंसर्वंछिंधितेदया॥१॥
हंसउवाच॥चापस्थेचयदाभानौसर्वकामान्विहायच॥सूर्योदयेसमाप्योथानित्यकर्मण्यथाविधि॥२॥ब्राह्मणान्भोजयित्वाथस्मरेद्देवकि
नंदनं॥पश्चात्तुपारिकंकार्यंनदोषोभोजनेकृते॥३॥ब्रह्मोवाच॥सूर्योदयात्सर्वमेवकर्यंकार्यंतुआह्निकं॥इतिनःसंशयंछिंधिसर्वज्ञोसिम
हामते॥४॥हंसउवाच॥यथास्नानंयथासंध्यायथाश्राद्धादिसक्रिया॥तथैवचधनुर्मासेपूजाकार्याहरेःसदा॥५॥मासपूजात्वशक्तश्चेत्काको
लेकालेचकंजपं॥अर्कवारेव्यतीपाते वैधृतेवेनचसंयुते॥६॥तद्दिनेचहरेःपूजायथाविधानुसारतः॥कृष्णपक्षेकृतेपूजापितृणांतुष्टिदोभ
वेत्॥७॥शुक्लपक्षेकृतेपूजादेवानांहर्षदोभवेत्॥कुटुंबभोजनंकार्यंउषःकालेतुपूजनं॥८॥कुटुंबभोजनेशक्तोदंपतीभोजयेत्सदा॥
तेनैवसर्वपापानिविलयंयांतिसर्वदा॥९॥चापस्थेचयदाभानौब्राह्मणान्नयेन्निमंत्रयेत्॥विलयंसर्वपापानिहिभवश्चस्करोदरात्॥१०॥
अत्रेवोदाहरंतीममितिहासंपुरातनं॥श्रेष्ठायांसर्वमेध्यर्यवक्र्यांमघनाशनं॥११॥रेवातीरेपुराराजासत्यसंधोदृढव्रतः॥परस्त्री
लंपटोनित्यंतदर्थंबद्धुयत्नवान्॥१२॥तस्यैवनगरेविद्वान्वेदशास्त्रविशारदः॥नाम्नानारायणइतिनित्यकर्मसुलोलुपः॥१३॥अकस्मा
द्धनुषोमासोदेवेछादागतस्तदा॥पुण्यकालंतदावीक्ष्यब्राह्मणोहर्षमागतः॥१४॥देवपूजांतथाकृत्वास्वगृहेतुनिरंतरं॥भरणोदयवेला
यांस्नात्वाचैक्यथाविधिः॥१५॥चित्रान्नंनवनीतंमक्षेनानाविधैरुपैः॥शाकैश्चविविधैश्चैवचोष्यैःखाद्यैःसमन्वितः॥१६॥ब्राह्मणान्
भोजयित्वाथस्वयंभुक्त्वाद्विजोत्तमः॥तांबूलंदक्षिणांदत्वाआशीर्वादान्गृहीत्यच॥१७॥एतच्छ्रुत्वाव्रतंराजाखराष्ट्रेचमहोत्सवं॥स्वयंकर्तु
मनश्चक्रेविप्रान्केचिन्निमंत्रयेत्॥१८॥विचार्यैवंपुनःपश्चाद्ग्रामेनारायणाह्वयं॥पौराणिकंस्वग्रामस्थंवेदशास्त्रविशारदं॥१९॥निमं

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

त्रिनार्थं विप्रषेः राजागत्यामहामनाः। मंदिरं तुनरादृष्ट्वा शिष्यैः स्नानसमन्वितं। २७। धनुर्मासस्य महात्म्यं दंपतीभोजनादिकं। वस्त्रालंकारदानं च ब्राह्मणानां प्रदापयेत्। २८। विन्नाल्लक्षीं पृथुकटिं घनीभूतपयोधरां। सिंहमध्यसमादृष्ट्वा सद्योमोहवशंगतः। २९। वक्षादरपुरस्कृत्यसभार्यं चेद्विजोत्तमं। भोजयेन्मासपर्यंतं सपत्नीकं द्विजोत्तमं। ३०। निमंत्रितंसभार्यं च यावन्मासंसमापयेत्। रात्रौ स्थापयेममरं दृष्ट्वा चैवविधानतः। ३१। भोजनेनुषसःकाले कृत्वा गच्छेत्स्वमंदिरं। इत्युक्त्वाप्रययौ राजाहर्षेणैवसमन्वितः। ३२। गृहंगतामतल्लक्ष्मीं तोकदासार्यभर्वदिति। भानुरस्तंगतेज्ञात्वासपत्नीकं द्विजोत्तमं। ३३। आदरयामासदूतेन रथंगत्वागृहंप्रति। ब्राह्मणाक्रूतदादृष्ट्वा राजदूतंसमागतं। ३४। जगामत्वरयाब्रह्मन्सभार्यो राजमंदिरं। विप्रंदृष्ट्वा सपत्नीकं तदाराजाब्रवीदिदं। ३५। रूक्ष्वापभार्यया साकंस्वेछया विप्रसत्तमः। निशायांउत्थितोराजा ब्राह्मण्या संगकारणात्। ३६। आत्मनोगात्रयेषादंसंदृष्ट्वयथेछया। ✱ प्रासादशयनंकार्यं स्त्रियासहमहामुने। इत्युक्त्वोत्सरोहाथप्रासादंस्वयंकृतं। ३७। ✱ यमदूतास्तदाजग्मुः विछुदूतास्तथैवच। ३८। यमदूतान्निराकृत्यविछुदूतास्तदाब्रुवन्। अनेनधनुषोमासेब्राह्मणांश्चनिमंत्रिताः। ३९। तेनपुण्यप्रभावेन विछुलोकमवाप्नवान्। सपत्नीकं ब्राह्मणंचयःकृत्वाभोजयेत्तदा। ४०। तस्यपुण्यस्यविस्तारोब्रह्मणैवहिवाभुवि। इत्युक्त्वाययुर्दूताः विछुलोकमकल्मषं। ४१। तस्माच्चधनुषोमासः सर्वपुण्यप्रदायकः। इतिश्रीपंचरात्रागमेधनुर्मासमाहात्म्येद्वितीयोध्यायः। २। ब्रह्मोवाच। धनुर्मासेहरेः पूजाकथंकार्यानुदुर्लभैः। एतद्विस्तरतःश्रोतुंइच्छास्तीचसदाममं। १। ईश्वरोवाच। यथायथाशक्तिरस्तितथाकार्यंसुरेत्तम। आलस्याद्यदिलोभाद्वानकरोतिनराधमः। २। रौरवंनरकंयातियावदिंद्राश्चतुर्दश। आत्महासनुविज्ञेयोदरिद्रेहीनसंज्ञयः। ३। यद्दुष्कृतभवेत्तेयेनतेदेयंतुद्विजातये। तेनैवसुकृतंलब्धाविछुलोकेमहीयते। ४। कोमलैस्तुलसीदलैर्विल्वैर्मुद्गैश्चविमिश्रितैः। लसल्लवणमिश्रं

२

चमरीघृतसमन्वितं। ५। शृंगबेरसमायुक्तं हिंगुजीरकमिश्रितं। पाकांतेगोघृतेनैर्युक्तं सर्वद्रव्यैश्चसंयुतं। ६। गव्यंचदधिखंडेघृतंचनवनीतंसुभास्वरं। तांबूलैः कोमलैर्दिव्यैः पूगखाद्यादिसंयुतं। ७। दक्षिणांश्चततोदत्वादरिद्रस्यैवभवेद्यदि। यद्यन्नकोनरोयस्तुब्राह्मणानांतुभोजने। ८। सर्वेपिरसंयुक्तं तंडुलंचनिवेदयेत्। एकेकंनवनीतादिब्राह्मणानांतुयोनरः। ९। तेनैवसर्वपुण्यानिलभ्यतेनात्रसंशयः। चापस्थेचयदाभानौ तंडुलं चप्रयच्छति। १०। पूर्णमायुष्यमाप्नोतिदुग्धंचविनयेति। मुक्तंचैवतुविप्रायसुरारिप्रीतिकारणात्। ११। सुरारिलोकमाप्नोतिब्रह्महत्याकृतोपिचेत्। नवनीतंचयोदद्याद्घृतंप्रीतिकारणात्। १२। केटभारेः पादमूलंप्राप्नोत्येवनसंशयः। दधिखंडंचयोदद्याद्वैष्णवायद्विजातये। १३। सर्वपापविनिर्मुक्तो विछुलोकंसगच्छति। माषान्नंयोद्विजेंद्राय ग्रहपीडादिनाशनं। १४। तस्मान्माषंप्रदातव्यं धनुर्मासेद्विजोत्तमाः। गोघृतंचैवयोदद्यात्तत्कृतंपापनाशनं। १५। तेनैवमोक्षमाप्नोतिनात्रकार्याविचारणात्। पूगीफलसमायुक्तं नागवल्लीदलैर्युतं। १६। कर्पूरेणसमायुक्तं दद्यात्तांबूलमुत्तमं। तांबूलंनुयशोधैर्यश्रियः प्राप्नोतिमानवः। १७। रोगीनुभविरोगीस्यान्निरोगीमोक्षमाप्नुयात्। चापस्थेचयदाभानौ योदद्याकंबलं शुभं। १८। अपमृत्युः कालमृत्योः मुक्तोभवतितत्क्षणात्। वस्त्रदानंतुयोदद्यात्प्रीत्यर्थंब्रह्मणेद्विजातये। १९। तस्यपुण्यफलंवक्तुनाहंशक्तोस्मिमानवः। ऊर्णावस्त्रंतुयोदद्यात्तत्वनिष्ठायस्यात्मने। २०। तस्यपुण्यफलंवक्तुकः शक्तोदिविवाभुवि। आढकंगुडसंयुक्तं घृतमद्याद्विजातये। २१। अपमृत्युः कालमृत्युः मुक्तोभवतितत्क्षणात्। कुष्मांडदानंयोकुर्यात्चापस्थेभास्करेसति। २२। ननस्यसंततेर्हानिर्जायतेब्रह्मणोरुषी। नारिकेलफलंचैवविप्रे वर्यायमंधीमते। २३। सप्तजन्मभवेद्विप्रो धनाढ्योवेदपारगः। कुलेश्वसप्तभिर्युक्तो मोदतेविछुमंदिरे। २४। तस्माद्दानंप्रकर्तव्यं नरैःसंप्रतिविछुप्रीतिप्रदंचयत्। इतिश्रीपंचरात्रागमेधनुर्मासमहात्म्येतृतीयोध्यायः। ३। ब्रह्मोवाच। हरेःप्रीतिविनोधोर्थं ब्राह्मणानांनिमंत्रयेत्। पूर्वोक्तेनैवविधिनेत्युक्त्वातुस्करोत्तमाः। १। अनुकूलेग्रहेनास्तीकथंकार्यंद्विजातिभिः। एतद्ब्रूहिमहाभाग सर्वज्ञोसिसुरोत्तम। २। हंस उवाच। ब्रह्म

णान्गृहमादूय यन्निमंत्रितसत्तमः। तस्माच्छ्रद्धिपुणंपुण्यंगृहंगत्वानिमंत्रितं। ३। तद्भुक्त्वाभोजनंदेयंदृतिरद्धिसकोत्तम। पाकंकृत्वाब्राह्मणांश्चदत्वापुण्यंचलभ्यते। ४। तस्मुण्याद्धिपुणंपुण्यस्वयंपाककृतेसति। तस्माद्दृष्टएणापुण्यंगृहंगत्वासमृद्धितः। ५। आमंदत्वाद्विजेंद्रायसर्वोपस्करसंयुतं। भक्त्याचतत्कुरुहेमुक्तिकासर्वपापैः प्रमुच्यते। ६। महापातकसंप्राप्तगछेद्दुछवमंदिरे। याचयेद्दद्यवस्यान्नंतदभावेजलं पिबेत्। ७। इतिज्ञात्वेहविप्रेंद्रसपत्नीकंद्विजोत्तमः। भोजयित्वागृहंगछन्समृक्तोभवतिध्रुवं। ८। भोजनाद्धिपुणंपुण्यंस्वयंपाककृतेद्विजे। तदेतद्धिषयंप्रोक्तं पूर्वैःकनुकथांतरं। ९। द्वापरेथयुगेपूर्वंपांडवायज्ञमारभेत्। ब्राह्मणानांसहस्रंतुप्रत्यहंभोजनंभवेत्। १०। एकस्मिन्नेवहिदिने मध्यान्हसमयेद्विजः। अन्नार्थीब्राह्मणःकश्चित्धर्मराजगृहंप्रति। ११। दृष्ट्वानुधर्मराजाय अन्नंदेहीत्यवाचतं। श्रुत्वातद्वचनंसम्यक्स्मात्स्थागछेद्विजोत्तम। १२। इत्युक्त्वानुतदाविप्रोस्वयंपाकीत्वहंहिति। इत्युक्तेप्राहसद्राजापाकंनेवाद्विजोत्तमः। १३। द्रौपदीपाककर्त्रीचभीमस्तत्परिवेषणे। ब्राह्मणानांपूजनेतुअहंकर्त्ता। नरोत्तमः। १४। तस्मान्मयृदेविप्रसंदेहंचनविद्यते। इत्युक्त्वाधर्मराजानुदूरंस्थित्वासुदूर्नकं। १५। तस्मिन्नेवद्विकालेतुकृछ्रोएत्यनुपार्थिवं। अब्रवीद्याचदश्रेष्ठोकस्मादानेतवांतिके। १६। राजातदाब्रवीत्कृछ्रंस्वयंपाकंकरोम्यहं। इत्युक्तेतेनदाविप्रोस्थलंचैवनविद्यते। १७। इत्युक्त्वातंराजानंवक्ताकृछ्रोजगामहः। एवंचनाहंराजेंद्रआज्ञांदेहिद्विजोत्तमं। १८। शक्तिर्नास्तिसकंगछद्भक्तिवत्तुनशक्यते। इत्युक्तेधर्मराजानुतदाकृछ्रोब्रवीदिदं। १९। भोजनंसकलेविप्रस्वयंपाकंकरुष्वच। तथास्त्वितिब्रवीद्राजाब्राह्मणोहर्षमागतः। २०। स्वयंपाकंचकृत्वानूसर्वोपस्करसंयुतं। कृछ्रोःसाकंतदाविप्राभुक्तवान्राजमंदिरे। २१। ब्राह्मणानांतदापात्रंकृछ्रोयोगेश्वरेश्वरः। विहायमासभगवान्एकपात्रंविहायच। २२। राजादातंब्रवीत्कृछ्रंकथंतेनद्विहायच। इत्युक्तवंतंराजानंविस्मितोस्मिमहीपते। २३। स्वयंनिर्वाहमकरोद्राजादृष्ट्वामहद्भुतं। पात्रायानंतमगमत्सहस्रंचयदागमत्। २४। समाप्तिमेगमन्नत्रकृछ्रो

ष्याद्दतदान्पं। नेतदाश्चर्यन्वोमेनः स्वयंपाकेमहाफले। २५। दृष्ट्वकृछ्रंवैश्वदेवकरणात्देवानांसत्क्रियां। स्वयंपाकंविशिष्टोहंकृतेचचतुरानने। २६। दानंदद्याद्विजेंद्रायकूष्मांडंब्रह्मनिर्मितं। कूष्मांडस्यप्रदानेनसंततिर्वर्द्धतेसदा। २७। धनुर्मासस्यमाहात्म्यंश्रुत्वामोक्षमवाप्नुयात्। २८। ॥इतिश्रीपंचरात्रागमेधनुर्माहात्म्येचतुर्थोध्यायः। ४॥ ॥ब्रह्मोवाच॥ देवदेवारविंदाक्षमायातीतमहामते। इदानींतुचिरंब्रूहिसूर्यैधत्वाख्यमागतं। १। हंसोवाच॥ धनुर्मासविधिंवक्ष्येशृणुष्वकमलोद्भवे। यत्कृत्वामुच्यतेजंतुःनकृतंतुसमाहितः। २। रात्रौचतुर्थभागेतुकृत्वास्नानंयथाविधिः। पुण्याहवाचनंकुर्यादेवपूजांततःपरं। ३। देवस्यपुरतोब्रह्मन्ब्राह्मणानांततःपरं। सहस्रनामपठनंकुर्यादेवस्यभक्तितः। ४। धनुर्मासेहरेःप्रीत्यैमुक्तानंगुडसंयुतं। एवंपूजांमुनेर्नित्यंब्राह्मणान्भोजयेत्ततः। ५। स्वयंमध्यान्हकालेतुभुंजीयान्नियमव्रतः। एवंयःकुरुतेभक्त्यामासेसद्रत्नफलंलभेत्। ६। धनुर्दिनेतिमंत्रेणकुसरान्नेनहोमयेत्। सर्वःसिद्धफलंदद्यात्होमनैवेद्यसमापयेत्। ८। श्रीकृछ्रप्रतिमांचैवआचार्यायनिवेदयेत्। पूर्णादुर्तिंततोदद्यात्यस्यस्मृत्यासमापयेत्। ९। आचार्यायचहोमांतेतद्दद्याद्धेनुमिथुनंततः। ब्राह्मणान्भोजयेत्पश्चाद्यथावित्तानुसारतः। १०। देवस्यपश्चिमेभागेबलिंदद्याद्यथाविधिः। हरिद्राचूर्णयुक्तेनकुसरान्नंविकीरयेत्। ११। एवंयःकुरुतेभक्त्यामासेस्मिंस्तूर्यसंज्ञके। सलोकंश्रीपतेर्याति नात्रकार्याविचारणा। १२। कोदंडेसविताचैवप्रत्यूषेपूजयेद्धरिं। दूरदर्शनाद्भवेत्पुण्यंस्पर्शनफलंयदि। नैकेनसिध्यति। ॥इतिश्रीपंचरात्रागमेधनुर्मासमाहात्म्येदंसद्ब्रह्मसंवादे पंचमोध्यायः॥५॥ श्रीकृछ्रगोविंदार्पणमस्तु॥ ॥छ०॥ ॥छ०॥ ॥छ०॥ ॥छ०॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ इतिधनुर्मासकथासमाप्ता॥